# shrIviShNustutiH (kardamakRRitA)

# શ્રીવિષ્ણુસ્તુતિઃ (કર્દમકૃતા)

## Document Information

Text title : viShNustutiHkardama

File name : viShNustutiHkardama.itx

Category : vishhnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

shrIviShNustutiH (kardamakRRitA)

# શ્રીવિષ્ણુસ્તુતિઃ (કર્દમકૃતા)

જુષ્ટં બતાદ્યાઽખિલસત્ત્વરાશેઃ સાંસિધ્યમક્ષ્ણોસ્તવ દર્શનાન્નઃ ।
યદ્દર્શનં જન્મભિરીડ્ય સદ્ભિરાશાસતે યોગિનો રૂઢયોગાઃ ॥ ૧॥

યે માયયા તે હતમેધસસ્ત્વત્પાદારવિન્દં ભવસિન્ધુપોતમ્ ।
ઉપાસતે કામલવાય તેષાં રાસીશ કામાન્ નિરયેઽપિ યે સ્યુઃ ॥ ૨॥

તથા સ ચાહં પરિવોઢુકામઃ સમાનશીલાં ગૃહમેધધેનુમ્ ।
ઉપેયિવાન્મૂલમશેષમૂલં દુરાશયઃ કામદુઘાઙ્ઘ્રિપસ્ય ॥ ૩॥

પ્રજાપતેસ્તે વચસાધીશ તન્ત્યા લોકઃ કિલાયં કામહતોઽનુબદ્ધઃ ।
અહં ચ લોકાનુગતો વહામિ બલિં ચ શુક્લાનિમિષાય તુભ્યમ્ ॥ ૪॥

લોકાંશ્ચ લોકાનુગતાન્ પશૂંશ્ચ હિત્વા શ્રિતાસ્તે ચરણાતપત્રમ્ ।
પરસ્પરં ત્વદ્ગુણવાદસીધુપીયૂષનિર્યાપિતદેહધર્માઃ ॥ ૫॥

ન તેઽજરાક્ષભ્રમિરાયુરેષાં ત્રયોદશારં ત્રિશતં ષષ્ટિપર્વ ।
ષણ્નેમ્યનન્તચ્છદિ યત્ત્રિણાભિકરાલસ્રોતો જગદાચ્છિદ્ય ધાવત્ ॥ ૬॥

એકઃ સ્વયં સન્ જગતઃ સિસૃક્ષયા દ્વિતીયયાઽઽત્મન્નધિયોગમાયયા ।
સૃજસ્યદઃ પાસિ પુનર્ગ્રસિષ્યસે યથોર્ણનાભિર્ભગવન્ સ્વશક્તિભિઃ ॥ ૭॥

નૈતદ્બતાધીશ પદં તવેપ્સિતં યન્માયયા નસ્તનુષે ભૂતસૂક્ષ્મમ્ ।
અનુગ્રહાયાસ્ત્વપિ યર્હિ માયયા લસત્તુલસ્યા તનુવા વિલક્ષિતઃ ॥ ૮॥

તં ત્વાનુભૂત્યોપરતક્રિયાર્થં સ્વમાયયા વર્તિતલોકતન્ત્રમ્ ।
નમામ્યભીક્ષ્ણં નમનીયપાદસરોજમલ્પીયસિ કામવર્ષમ્ ॥ ૯॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્ગતા કર્દમકૃતા વિષ્ણુસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIviShNustutiH (kardamakRRitA)*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*